SAMVARDHINI
PEER REVIEWED MULTILINGUAL E-RESEARCH JOURNAL
(ISSN ONLINE: - 2583-7176)
https://samvardhini.in
https://www.samskritpromotion.in

SAMVARDHINI :- 01/06/2025
Volume – 7
Issue – 1
(ISSN ONLINE:- 2583-7176)
https://samvardhini.in

# रघुवंशे निर्दिष्टानां कतिपयवृक्षाणामायुश्शास्त्रदिशा पर्यालोचनम्

**Dr Thiagarajan S**

**शोधसारांश**

विदितमेव सर्वेषां सहृदयहृदयानां काव्यरसास्वादिनां यत्कालिदासस्य रचनायाः महत्त्वपरिगणनं किञ्चिद्दुष्टकरमेव। यतः संस्कृतवाङ्मये काव्यक्षेत्रे च कवेरस्य बह्व्यः रचनाः समुपलभ्यन्ते। एवं प्रसिद्धासु कृतिषु कुमारसंभवं रघुवंशञ्च महाकाव्यक्षेत्रे, शाकुन्तलं मालविकाग्निमित्रञ्च नाटकक्षेत्रे, प्रसिद्धत्वं भजन्ते। तत्र रघुवंशमहाकाव्यं कवेरस्य विद्वत्तायाः निपुणतायाश्च पराकाष्ठां प्रदर्शयति। एकोनविंशतिसर्गात्मके काव्येऽस्मिन् न केवलं भगवतः श्रीरामचन्द्रस्य, अपि तु संपूर्णस्य रघुवंशस्य राज्ञां चरितमपि प्रतिपादितं दृश्यते। महाकवेरस्य आलङ्कारिकवैदुष्यं तत्र दृश्यते यत्रानेन महाकाव्यांशैः सह तात्कालिकसामाजिकविषया अपि प्रतिपादिताः। तद्रीत्या पर्यालोच्यमाने इतिहासप्रतिपादनपरेऽस्मिन् महाकाव्ये केचन वैद्यविषयसङ्केता अपि द्रष्टुं शक्याः। महाकविना तत्र तत्र श्लोकेषु आयुश्शास्त्रे प्रतिपादितानां वृक्षाणां द्रव्याणां वा नामानि निर्दिष्टानि। तं सन्दर्भं किञ्चित्सूक्ष्मेक्षिकदृष्ट्या आलोचयामो यदि तर्हि न केवलं महाकवेरस्य काव्यनैपुण्यमपि तु सर्वशास्त्रनैपुण्यं ज्ञातुं शक्यते। पत्रेऽस्मिन् तानि पद्यानि स्वीकृत्य तत्र निर्दिष्टानां वृक्षाणामायुश्शास्त्रदिशा किं प्रयोजनम्, अस्य निर्देशोऽत्र काव्ये किमर्थं कथञ्च महाकविना कृतः इत्येतत् सर्वं सप्रमाणं निरूप्यते॥

**Keywords:** Āyurveda, Raghuvaṃśa, Kālidāsa, Caraka, Carakasaṃhitā, Medicinal trees, Cikitsā, Nighaṇṭu, Vṛkṣāyurveda

**कुञ्जीशब्दाः** - आयुर्वेदः, रघुवंशम्, कालिदासः, चरकः, चरकसंहिता, वैद्यवृक्षाः, चिकित्सा, निघण्टु, वृक्षायुर्वेदः

**Dr Thiagarajan S**
Assistant Professor (Sr. Gd.)
Department of Amrita Darshanam (ICSS),
Amrita Vishwa Vidyapeetham,
Chennai Campus 601103
s_thiagarajan@ch.amrita.edu
+91-9791795750

**उपोद्घातः**

विदितमेव सर्वेषां सहृदयहृदयानां काव्यरसास्वादिनां यत् कालिदासस्य रचनायाः परिगणनं किञ्चिद्दुष्टकरमेव। यतः संस्कृतवाङ्मये काव्यक्षेत्रे च कवेरस्य बह्व्यः रचनाः समुपलभ्यन्ते। एवं प्रसिद्धासु कृतिषु कुमारसंभवं रघुवंशञ्च महाकाव्यक्षेत्रे, शाकुन्तलं मालविकाग्निमित्रञ्च नाटकक्षेत्रे प्रसिद्धत्वं भजन्ते। तत्र रघुवंशमहाकाव्यं कवेरस्य विद्वत्तायाः निपुणतायाश्च पराकाष्ठां प्रदर्शयति। यद्यपि सर्वासु कृतिषु कवेरस्य नैपुण्यं विद्वत्वं च सुष्ठु द्रष्टुं शक्यते तथाऽपि इतिहासेतिवृत्तमाधारीकृत्य रचितमिदं काव्यं न केवलं रघोः वंशस्य चरित्रं प्रतिपादयति, अपि तु स्वस्मिन् निहितया आलङ्कारिकशैल्या संस्कृतकाव्यक्षेत्रे महत्स्थानमावहति। काव्यमिदम् एकोनविंशतिसर्गात्मकं यत्र न केवलं भगवतः श्रीरामचन्द्रस्य अपि तु संपूर्णस्य रघुवंशस्य ख्यातानां राज्ञां चरितमपि प्रतिपादितं दृश्यते। महाकवेरस्य आलङ्कारिकवैदुष्यं तत्र दृश्यते यत्रानेन महाकाव्यांशैः सह तात्कालिकसामाजिकविषया अपि प्रतिपादिताः। तद्रीत्या पर्यालोचनेन इतिहासप्रतिपादनपरेऽस्मिन् महाकाव्ये केचन वैद्यविषयसङ्केता अपि समुपलभ्यन्ते। महाकविना अनेन तत्र तत्र श्लोकेषु आयुश्शास्त्रे प्रतिपादितानां वृक्षाणां द्रव्याणां वा नामानि निर्दिष्टानि। तं सन्दर्भं किञ्चित् विश्लेषणदृष्ट्या आलोचयामो यदि तर्हि न केवलं महाकवेरस्य काव्यनैपुण्यमपि तु सर्वशास्त्रनैपुण्यं ज्ञातुं शक्यते।

**विषयविवरणम्**

**अ. किमिदमायुश्शास्त्रम्**

**शरीरमाद्यं खलु धर्मसाधनम्** इत्युक्तरीत्या धर्मार्थकाममोक्षाख्यस्य पुरुषार्थचतुष्टयस्य प्राप्तये शरीरमत्यन्तं मुख्यं साधनं भवति। तस्य रक्षायै अष्टदशविद्यासु धन्वन्तरिप्रणीतं वैद्यकशास्त्रमुपकुरुते। आयुः अनेन विन्दति वेत्ति वा आयुर्वेदः। अयमेवायुर्वेदः आयुश्शास्त्रमित्यपि अभिधीयते। आयुर्वेदसंबद्धाः ग्रन्थाः यद्यपि बहवः स्युः तथाऽपि तेषां सर्वेषां ग्रन्थानाम् आधारः क इति पृष्टे -

**चरकः सुश्रुतश्चैव वाग्भटञ्च तथाऽपरः।**
**मुख्याश्च संहिता वाच्यास्तिस्र एव युगे युगे॥**[1]

इत्युक्तरीत्या इमाः तिस्रः संहिताः मुख्यतमाः वर्तन्ते। एवं लोकानां श्रेयस्साधनतया हितावहेषु विविधेषु ज्ञानविज्ञानप्रभेदेषु सर्वोपजीव्यं विज्ञानरत्नमिदम् आयुश्शास्त्रम् इति सुष्ठु ज्ञायते।

**आ. कालिदासकृतिषु रघुवंशं तत्र आयुश्शास्त्रविषयाश्च**

पूर्वोक्तरीत्या कालिदासकृतयः स्वस्यां सर्वमपि ज्ञानं निहितं विराजन्ते। अत एव श्रूयते –

**निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।**
**प्रीतिर्मधुरसार्द्रासु मञ्जरीष्विव जायते॥**[2] इति।

तादृश्यः गभीराः गुणोपेताश्च कृतयः विरचिताः कविकुलगुरुणानेन संस्कृतकाव्यक्षेत्रे। महाकविना अनेन इतिहासावाश्रित्य बहवः ग्रन्थाः लिखिताः। तत्र आदिकाव्यत्वेनाभिधीयमानं भगवतः रामचन्द्रस्य

1. हारीतोत्तरम् - परिशिष्टाध्यायः - ६, ७
2. हर्षचरितम् १.१६

चरित्रवर्णनपरं वाल्मीकिरामायणमाश्रित्य न केवलं रामचन्द्रस्य चरित्रमलं भवेदिति धिया संपूर्णस्यापि सूर्यवंशस्य ज्ञानं जिज्ञासूनां स्यादिति विचिन्त्य कृतमिदं रघुवंशमहाकाव्यम्। काव्यमिदम् एकोनविंशतिसर्गेषु निबद्धमस्ति, सर्वेऽपि आलङ्कारिकांशाः अत्र निविष्टा इत्यादिकं तु बहुभिः विद्वभिः बहुधा चर्वितमस्ति इत्यस्मात् नवांशं ज्ञातुं प्रयत्नः विधेयः। तद्रीत्या यथा कविनानेन काव्येऽस्मिन् सामाजिकविषयाः, संप्रदायविषयाः, धर्मशास्त्रविषयाः, नीतिशास्त्रविषयाः तत्र तत्र उपमारूपेण वर्णनरूपेण वा निर्दिष्टाः वर्तन्ते तथैव आयुश्शास्त्रीयविषया अपि। ते विषयाः प्रस्तूयन्ते।

**इ.रघुवंशे निर्दिष्टानां वृक्षाणाम् आयुश्शास्त्रीयं पर्यालोचनम्**

**1. अगुरु**

*क.पदव्युत्पत्तिः कोषसन्दर्भश्च –*

न गुरु दुर्भरः अस्मात् इति अगुरु। शिंशपावृक्षः। द्रविडभाषायाम् अगिल् (அகில்) इत्यभिधीयते। कालागुरु इत्यपि अस्य नामान्तरम्। स्वनामप्रसिद्धसुगन्धिकाष्ठविशेषः इति शब्दकल्पद्रुमे निर्दिष्टः वर्तते।

अमरकोषे तु –

**अरिष्टः सर्वतोभद्रहिङ्गुनिर्यासमालकाः।**

**पिचुमन्दश्च निम्बेऽथ पिच्छिलागुरु शिंशुपा।।**[3] इति अस्य उल्लेखः वर्तते।

*ख. रघुवंशे सन्दर्भः*

षष्ठे सर्गे -

**अथ स्तुते बन्दिभिरन्वयज्ञैः सोमार्कवंश्ये नरदेवलोके।**

**संचारिते चागुरुसारयोनौ धूपे समुत्सर्पति वैजयन्तीः।।**[4]

स्वयंवरसमये इन्दुमती सर्वान् नृपतीन् अतिक्रम्य गच्छति सति मञ्चान्तरराजमार्गं विवेश इति पद्यादस्मादारभ्य अग्रे त्रिषु पद्येषु वर्णयति कविः। तत्र प्रथमं पद्यमिदम्। सा इन्दुमती राजवंशाभिज्ञैः स्तुतिपाठकैः चन्द्रसूर्यवंशभवे राजसमूहे स्तुते सति राजमार्गं विवेश। समन्तात् प्रचारिते अगुरुसारयोनौ धूपे पताकाः समुत्सर्पति सति अतिक्रम्य गच्छति सति इति श्लोकार्थः। अग्रिमपद्ये अस्य अनुवर्तनं वर्तते। प्रकृते च अगुरुसारयोनौ धूपे इत्यत्र अगुरुवृक्षः निर्दिष्टः। अगुरुसारः योनिः कारणं यस्य सः अगुरुसारयोनिः, तस्मिन् अगुरुसारयोनौ इति धूपस्य विशेषणमिदम्। सारो नाम कश्चन वृक्षनिर्यासविशेषः। प्रकृते च अगुरुवृक्षस्य निर्यासविशेषः निर्दिष्टः। तदेव च कारणं भवति धूपस्य। एवञ्च राजसभायाम् अगुरुसारयोनौ धूपे पतकाः अतिक्रम्य गच्छति इन्दुमती इति वर्ण्यते।

एवमेव चतुर्थे सर्गे –

**चकम्पे तीर्णलौहित्ये तस्मिन्प्राग्ज्योतिषेश्वरः।**

**तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः।।**[5]

---

3. अमरकोषः २.४.६२

4. रघुवंशम् ६.८

5. रघुवंशम् ४.८१

इत्यत्र रघोः नागानां ग्रीवाश्रृंखलाकर्षणात् कालागुरुतरवः यथा कम्पन्ते स्म तथा प्राग्ज्योतिषेश्वरोऽपि चकम्पे इति उपमारूपेण अत्र कालागुरुद्रुम इति अस्य अगुरुवृक्षस्य नामान्तरेण निर्देशः कृतः कविना।

*ग. पर्यालोचनम्*

अस्य च अगुरुवृक्षस्य निर्देशः तत्र तत्र चरकसंहितायां वर्तते। यथा आदौ –

**शटीपुष्करमूलाम्ल-वेतसैलाहिङ्ग्वगुरुसुरसातामलकीजीवन्तीचण्डा इति दशेमानि श्वासहराणि भवन्ति**[6]

इति श्वासहरमहाकषाय-निर्देशसमये वृक्षस्य अस्य निर्देशो दृश्यते।

किञ्च तत्रैव मात्राशितीये अध्याये –

**श्वेता ज्योतिष्मती चैव हरितालं मनःशिला।**
**गन्धाश्चागुरुपत्राद्या धूमं मूर्धविरेचने।।**[7]

इति मूर्धविरेचनधूमवर्तिद्रव्याणां निर्देशेऽपि अस्य निर्देशः दृश्यते। अस्य व्याख्यावेलायां चक्रपाणिदत्तः – सुगन्धद्रव्याणि, तेषां विशेषणम् अगुरुपत्रादयाः इति निर्दिशति। तथा च पूर्वोक्तरीत्या सुगन्धयुक्तः वृक्षविशेषोऽयमिति ज्ञायते।

अस्यैव अगुरुवृक्षस्य निर्देशः कुत इति चेत् – राजसभासु धूपकरणाय अस्यैव वृक्षस्य सारः उपयुज्यते यश्च श्रेष्ठतमः इत्यत्र प्रमाणानि लभ्यन्ते। आदौ यथा महाभारते अनुशासनपर्वणि भीष्मेण युधिष्ठिरं प्रति पुष्पधूपदीपदानादिप्रशंसापरे बलिशुक्रसंवादानुवादप्रसङ्गे –

**धूपांश्च विविधान्साधूनसाधूंश्च निबोध मे।**
**निर्यासाः सारिणश्चैव कृत्रिमाश्चैव ते त्रयः।।**[8]

इत्यस्मिन् पद्ये शुक्रस्य वचने धूपाः त्रिधा वर्तन्ते इति निर्दिश्य तत्र काष्ठाग्निसंयोगान्निस्सरन्तः धूपाः सारिणः इत्यभिधीयन्ते इत्यपि निर्देशं दत्त्वा अग्रिमे पद्ये अगुरुवृक्षस्य सारे किं विशेषणम्, किमर्थं तस्य प्रयोगः महाकविना कृतः वर्तते इत्यादिविषये विद्यमानां शङ्कां निवारयति -

**अगुरुः सारिणां श्रेष्ठो यक्षराक्षसभोगिनाम्।**
**दैत्यानां सल्लकीजश्च काङ्क्षितो यश्च तद्विधः।।**[9]

इत्यनेन भोगिनां राज्ञाम् अगुरुसारः श्रेष्ठः इति निर्दिष्टः दृश्यते। एवमेव वाल्मीकिये –

**आयागभूतं नृपतेस्तस्य वेश्मनि राघव।**
**अर्चितं विविधैर्गन्धैर्धूपैश्चागुरुगन्धिभिः।।**[10]

इति शिवधनुषः प्राप्त्यनन्तरं जनकमहाराजा किमकरोदिति वर्णनावसरे - आयागभूतं सुनाभं तद्धनुः विविधैः गन्धैः धूपैः अगुरुगन्धिभिश्च अर्चितं तेन राज्ञा इति तत्रापि अगुरुगन्धिभिरिति निर्देशात् भोगिभ्यः

6. चरकसंहिता, सूत्रस्थानम् ५.१६
7. चरकसंहिता, सूत्रस्थानम् ५.२६-२७
8. महाभारतम् १३.९८.४०
9. महाभारतम् १३.९८.४०
10. श्रीमद्रामायणम् १.३१.१३

राजभ्यः अगुरु रोचते इत्यस्मात्कारणान्महाकविना अगुरुवृक्षस्य निर्देशः कृतः वर्तते इत्यस्ति सूक्ष्मांशः विशेषांश्च।

**2. अशोकः**

*क.पदव्युत्पत्तिः कोषसन्दर्भश्च*

नास्ति शोको यस्मादिति अशोकः। पुष्पवृक्षविशेषः। अमरकोषे तु –

**एतस्य कलिका गन्धफली स्यादथ केसरे।**
**बकुलो वञ्जुलोऽशोके समौ करकदाडिमौ।।**[11]

इति वनौषधिवर्गे अस्य निर्देशः वर्तते। तस्य व्याख्यावेलायाम् अश्नुते व्याप्नोति इति अशोकः इति व्याख्यातृभिः व्युत्पत्तिः प्रदर्शिता वर्तते।

*ख. रघुवंशे सन्दर्भः*

अष्टमे सर्गे -

**कुसुमं कृतदोहदस्त्वया यदशोकोऽयमुदीरयिष्यति ।**
**अलकाभरणं कथं नु तत्तव नेष्यामि निवापमाल्यताम् ।।**[12]

अजस्य विललापोऽयम्। त्वया इन्दुमत्या कृतपादताडनरूपो दोहदः अयम् अशोकः यत् पुष्पम् उदीरयिष्यति, तव अलकानाम् आभरणरूपं तत्पुष्पं केन प्रकारेण दाहाञ्जलेः अर्घ्यतां नेष्यामि इति कथयति स्म ।

एवमेव अग्रिमे पद्ये –

**स्मरतेव सशब्दनूपुरं चरणानुग्रमन्यदुर्लभम्।**
**अमुना कुसुमाश्रुवर्षिणा त्वमशोकेन सुगातिर शोच्यसे।।**[13]

इति अन्यदुर्लभं ध्वनियुक्तं मञ्जीरं पादानुग्रहं चिन्तयता इव पुष्पाश्रुवर्षिणा अमुना अशोकेन हे सुगात्रि, त्वं शोच्यसे इत्यपि अशोकस्य निर्देशः दृश्यते।

*ग. पर्यालोचनम्*

अस्य च अशोकस्य निर्देशः चरकसंहितायां सप्तमे कल्पस्थाने आदौ मदनकल्पे विंशतीनाम् उत्कारिकाणां निर्देशावसरे - ….**अशोकरोहिणीनां विंशतेः अन्यतमस्य कषायेण साधितोत्कारिका उत्कारिकाकल्पेन मोदका वा मोदककल्पेन यथा दोषरोगभक्ति प्रयोज्या इति समानं पूर्वेण**[14] इत्यादिरूपेण अस्य निर्देशः दृश्यते।किञ्च जानीम एव वयं यदस्य अशोकस्य निर्देशः वाल्मीकिये बहुत्र दृश्यते। साहित्यदर्पणेऽपि सप्तमे परिच्छेदे –

**पादाघातादशोकं विकसति बकुलं योषितामास्यमद्यै-**
**र्यूनामङ्गेषु हाराः स्फुटति च हृदयं विप्रयोगस्य तापैः।**

---

11. अमरकोषः २.४.६४
12. रघुवंशम् ८.६२
13. रघुवंशम् ८.६३
14. चरकसंहिता, कल्पस्थानम् १.२३

**मौर्वीरोलम्बमाला धनुरथ विशिखाः कौसुमाः पुष्पकेतो-**
**र्भिन्नं स्यादस्य बाणैर्युवजनहृदयं स्त्रीकटाक्षेण तद्वत्।।**[15]

इत्येवमस्य निर्देशः दृश्यते। पूर्वोक्तपद्येन रघुवंशोक्तपद्येन च ज्ञायते यदयम् अशोकः सौभाग्यवतीनां स्त्रीणां पादप्रहारेण जायते इति। प्रकृते रघुवंशे इन्दुमत्याः पादताडनेन विकसितः अशोकः इति तस्याः सौभाग्यत्वनिर्देशपुरस्सरं कविना अस्य निर्देशः कृतः वर्तते। अस्य अशोकस्य के गुणाः इति पृष्टे – शीतलत्वं, हृद्यत्वं, पित्तदाहश्रमापहत्वं, गुल्मशूलोदराध्माननाशित्वं, कृमिकारकत्वमिति राजनिघण्टौ उक्तं वर्तते। तद्यथा -

**अशोकः शिशिरो हृद्यः पित्तदाहश्रमापहः।**
**गुल्मशूलोदराध्माननाशनः क्रिमिकारकः।।**[16]

### 3. इङ्गुदी

*क.पदव्युत्पत्तिः कोषसन्दर्भश्च*

इङ्गति ऊर्ध्वं गच्छति इति इङ्गुदी। वृक्षविशेषः। कोषवाक्यन्तु –

**राजादनः फलाध्यक्षः क्षीरिकायामथ द्वयोः।**
**इङ्गुदी तापसतरुर्भूर्जे चर्मिमृदुत्वचौ।।**[17]

इति वनौषधिवर्गे अस्य निर्देशः वर्तते। अस्य व्याख्यावेलायाम् – इङ्गुदः तापसतरुः। तापसस्य तरुः। तपस्विनः उपयुक्ततरुत्वादित्यर्थ उक्तः। तद्रीत्या आलोच्यमाने शब्दकल्पद्रुमे – इङ्गं द्यति अवखण्डयति इति इङ्गुदी इत्यस्य व्युत्पत्तिः प्रदर्शिता। इङ्गशब्दार्थस्तु जङ्गमम्, ज्ञानम् इत्यादिरूपेण बहुशः वर्तते। यत्किमपि वा भवति सर्वेषाम् अवखण्डनमेव तपोऽवस्थायां भवति इत्यस्मात् व्युत्पत्तिरियमपि युज्यते।

*ख. रघुवंशे सन्दर्भः*

चतुर्दशे सर्गे -

**ता इङ्गुदीस्नेहकृतप्रदीपमास्तीर्णमेध्याजिनतल्पमन्तः।**
**तस्यै सपर्यानुपदं दिनान्ते निवासहेतोरुटजं वितेरुः।।**[18]

वने सीतायै विहितम् आतिथ्यं वर्णयति महाकविः। ताः तापस्यः तस्यै सीतायै दिनान्ते निवासहेतोः इङ्गुदीस्नेहेन कृतप्रदीपाम्, अन्तरास्तीर्णाशुद्धाजिनतल्पां पर्णशालां ददुरित्यर्थः।

*ग. पर्यालोचनम्*

चरके चिकित्सास्थाने कासचिकित्सिते –

**मनःशिलालमधुकमांसीमुस्तेङ्गुदैः पिबेत्।**
**धूमं तस्यानु च क्षीरं सुखोष्णं सगुडं पिबेत्।।**[19]

---

15. साहित्यदर्पणम् ७.२४
16. राजनिघण्टुः १०.५६
17. अमरकोषः २.४.४५
18. रघुवंशम् १४.८१
19. चरकसंहिता, चिकत्सास्थानम् १८.६९

इति निर्दिश्य इङ्गुदः पुत्रजीवकः, अस्य च धूमस्य पश्चात् क्षीरपानं, तीक्ष्णेन अनेन धूमेन क्रियमाणौजःक्षयादिभय-परिहारार्थम् इति अस्य उपयोगः निर्दिष्टः वर्तते। किञ्च तत्रैवाग्रे -

**त्वगैङ्गुदी बृहत्यौ द्वे तालमूली मनःशिला।**
**कार्पासास्थ्यश्वगन्धा च धूमः कासविनाशनः।।**[20]

इत्येते धूमाः वातकासविनाशाय स्वीकर्तव्या इत्युक्तत्वाद् कासविनाशित्वमस्य इङ्गुदीधूमस्य वर्तते इति ज्ञायते। परम् अत्र रघुवंशे महाकविना तु *इङ्गुदीस्नेह* इत्युक्तत्वात् किमस्य इङ्गुदीतैलस्य वैशिष्ट्यमिति चेद् राजनिघण्टौ –

**स्निग्धं स्यादिङ्गुदीतैलं मधुरं पित्तनाशनम्।**
**शीतलं कान्तिदं बल्यं श्लेष्मलं केशवर्धनम्।।**[21]

इति इङ्गुदीतैलस्य विशेषांशाः प्रोक्ताः वर्तन्ते। तस्माच्च प्रकृते स्निग्धं कान्तिदमिति उभयमिदं स्वीकर्तुं शक्यम्। तथा च प्रदीपस्य कान्तिदम् इङ्गुदीतैलम् इति ज्ञेयम्। तदपि कारणं भवति यत्सीतायाः निवासस्थाने इङ्गुदीतैलेन दीपं ददुः इति कथने।

**4. कदम्बः**

*क.पदव्युत्पत्तिः कोषसन्दर्भश्च*

शब्दकल्पद्रुमे तु कद्यते दर्शनात् विरहिणां चित्तवैक्लव्यं जायते अनेन इति कदम्बः वृक्षविशेषः इति व्युत्पत्तिः प्रदर्शिता वर्तते। अमरे तु –

**तूलं च नीपप्रियककदम्बास्तु हरिप्रियः।**
**वीरवृक्षोऽरुष्करोऽग्निमुखी भल्लातकी त्रिषु।।**[22]

इति निर्दिश्य व्याख्यायां कं कफं दमयति शमयति इति कदम्ब इति व्युत्पत्तिः प्रदर्शिता वर्तते।

*ख. रघुवंशे सन्दर्भः*

त्रयोदशे -

**गन्धश्च धाराहतपल्वलाना कादम्बमर्धोद्गतकेसरं च।**
**स्निग्धाश्च केकाः शिखिनां बभूवुर्यस्मिन्नसह्यानि विना त्वया मे।।**[23] इति।

लङ्कातः आकाशमार्गेण अयोध्यागमनसमये श्रीरामः सीतायै बहूनि स्थलानि प्रदर्श्य तत्संबद्धविषयं वदति स्म स्मारयति स्म च। तदा माल्यवतः वर्णनसमये यस्मिन् श‍ृङ्गे धाराभिः आहतपल्वलानां गन्धश्च अर्द्धोद्गतकेसरं नीपकुसुमं च मधुराः बर्हिणां केकाश्च, त्वया विना मे रामाय असह्यानि बभूवुरित्युवाच। अत्र कादम्बमर्धोद्गतकेसरम् इत्यस्मिन् कदम्बस्य इमानि कादम्बानि इति पुष्पाणां निर्देशः ज्ञेयः।

*ग. पर्यालोचनम्*

---

20. चरकसंहिता, चिकत्सास्थानम् १८.७५
21. राजनिघण्टुः १५.११६
22. अमरकोषः २.४.४२
23. रघुवंशम् १३.२७

चरके आदौ सूत्रस्थाने अन्नपानविध्यध्याये फलवर्गे–

**अवदंशक्षमं हृद्यं वातलं लवलीफलम्।**
**नीपं शताह्वकं पीलु तृणशून्यं विकङ्कतम्।।**
**प्राचीनामलकं चैव दोषघ्नं गरहारि च।**[24]

इति नीपं दोषघ्नम् इति निर्दिष्टं वर्तते। किमिदं नीपमिति चेत् कदम्बस्यैव अपरं नाम। अपि च अस्य कदम्बनिर्यासस्य किं वैशिष्ट्यमिति चेत्तत्रैव चरके सूत्रस्थाने षड्विरेचनशताश्रितीये -

**कुष्ठैलवालुककट्फलसमुद्रफेनकदम्बनिर्यासेक्षुकाण्डेक्ष्विक्षुरकवसुकोशीराणीति दशेमानि शुक्रशोधनानि भवन्ति**[25] इति निर्दिष्टं वर्तते। तत्र चक्रपाणिदत्तेन कदम्बो बहुफलः तस्य निर्यासः शुक्रशोधनः महाकषयः इति विवृतः वर्तते। राजनिघण्टावपि –

**कदम्बो वृत्तपुष्पश्च सुरभिर्ललनाप्रियः।**
**कादम्बर्यः सिन्धुपुष्पो मदाढ्यः कर्णपूरकः।।**
**कदम्बस्तिक्तकटुकः कषायो वातनाशनः।**
**शीतलः कफपित्तार्तिनाशनः शुक्रवर्धनः।।**[26]

इति कदम्बः सुरभिः ललनाप्रियश्च इति निर्दिश्य अस्य कषायो वातनाशनः, शीतलः, कफपित्तार्तिनाशनः, शुक्रवर्धनश्च भवति इत्युल्लेखो दृश्यते। प्रकृते रघुवंशे रामः सीतां विना स्वेनानुभूतं विरहं तस्यै कथयति स्म। तदा सुगन्धोपेतोऽपि कदम्बः सीतायाः अभावे रामाय असह्योऽभवदिति कविना वर्णितं द्रष्टव्यम्।

**5. तमालः**

*क.पदव्युत्पत्तिः कोषसन्दर्भश्च*

तम्यते इति तमालः इति व्युत्पत्तिः दृश्यते शब्दकल्पद्रुमे। अमरे –

**कालकस्कन्धस्तमालः स्यात् तापिच्छोऽप्यथ सिन्दुकः।**
**सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि।।**[27]

इति निर्दिश्य तमालस्य कालस्कन्धः, तापिच्छः, तमाल इति त्रीणि नामानि वर्तन्ते इति प्रदर्शितमस्ति। अस्य व्याख्यावेलायान्तु – तम्यते तापिभिः इति तमाल इति व्युत्पत्तिः प्रदर्शितः। तमु काङ्क्षायाम् इति धातुः। तापिनः छादयति इति तापिच्छः। छद अपसारणे इति धातुः।

*ख. रघुवंशे सन्दर्भः*

षष्ठे -

**ताम्बूलवल्लीपरिणद्धपूगास्वेलालतालिङ्गितचन्दनासु।**
**तमालपत्रास्तरणासु रन्तुं प्रसीद शश्वन्मलयस्थलीषु।।**[28]

---

24. चरकसंहिता, सूत्रस्थानम् २६.१४५
25. चरकसंहिता, सूत्रस्थानम् ४.१२
26. राजनिघण्टुः ९.९७,९८
27. अमरकोषः २.४.६८
28. रघुवंशम् ६.६४

इन्दुमत्याः स्वयंवरसमये पाण्ड्यराज्ञः वर्णनावसरे यदि पाण्ड्यराजानमेनं परिणयेत्तर्हि नागवल्लीदलैः परिणद्धासु एलावल्लरीभिः आलिङ्गितचन्दनासु तमालदलास्तरणासु मलयाचलस्थलीषु निरन्तरं रन्तुं प्रसीदति इति सखि निवेदयति इन्दुमत्यै। अत्र ताम्बूल-एला-चन्दन-तमालेत्येवंरूपेण बहूनां निर्देशः वर्तते। वस्तुतः एतैः विशेषणैः तादृशस्थलवानयं पाण्ड्यः इति निवेद्यते।

*ग. पर्यालोचनम्*

अत्रावधेयांशः कश्चन वर्तते। अस्य च तमालस्य रसः पत्रमिति प्रत्यङ्गं कञ्चिद्गुणं वहति। तत्र प्रमाणम् आदौ रसस्य –

**चन्दनं तगरं कुष्ठं हरिद्रे द्वे त्वगेव च।।**
**मनःशिला तमालश्च रसः कैशर एव च।**
**शार्दूलस्य नखश्चैव सुपिष्टं तण्डुलाम्बुना।।**
**हन्ति सर्वविषाण्येव वज्रिवज्रमिवासुरान्।**[29]

इति विषचिकित्सिते विषे शिरोगते चिकित्सायाः पद्धतौ अस्योल्लेखः वर्तते। यथा असुरान् वज्रिवज्रं हन्ति तथा एषां योगः सर्वविषाणि हन्ति इत्यर्थः। अस्यैव तमालस्य पत्रस्य किं वैशिष्ट्यमिति चेत्तत्रैव चरके चिकित्सास्थाने कुष्ठचिकित्सिते –

**कुष्ठं तमालपत्रं मरिचं समनःशिलं सकासीसम्।**
**तैलेन युक्तमुषितं सप्ताहं भाजने ताम्रे।।**
**तेनालिप्तं सिध्मं सप्ताहाद्धेति तिष्ठतो घर्मे।**
**मासान्नवं किलासं स्नानं मुक्त्वा विशुद्धतनोः।।**[30]

इति तमालपत्रेण सह पूर्वोक्तयोगः सिध्मकुष्ठे लेपयोगः भवति इति अस्य पत्रस्य वैशिष्ट्यं प्रतिपादितं दृश्यते। अत एव राजनिघण्टावपि -

**वस्त्रं तमालकं रामं गोपनं वसनं तथा।**
**तमालं सुरभिगन्धं ज्ञेयं सप्तदशाह्वयम्।।**
**पत्रकं लघु तिक्तोष्णं कफवातविषापहम्। |**
**वस्तिकण्डूतिदोषघ्नं मुखमस्तकशोधनम्।।**[31]

इति अस्य तमालपत्रस्य कपवातविषापहत्वं सूचितं दृश्यते। प्रकृते रघुवंशे च इन्दुमती यदि पाण्ड्यराजं विवाहं कर्तुम् इच्छेत तर्हि तस्य राज्ये विद्यमानानां नानाविधानां वृक्षाणां गुणैः विशिष्य तमालवृक्षस्य गुणेन लाभान्विता भविष्यति इति सख्याः निवेदनपुरस्सरं तमालवृक्षस्य न केवलं निर्देशः, अपि तु तद्वैशिष्ट्यमपि प्रादर्शयत् कविः।

---

29. चरकसंहिता, चिकित्सास्थानम् २३.१९१-१९३
30. चरकसंहिता, चिकित्सास्थानम् ७.११७-११८
31. राजनिघण्टुः ६.१७४-१७५

**उपसंहारः**

न केवलमेतावता अपि तु अन्यत्र बहुषु श्लोकेषु तत्र तत्र आयुर्वेदसंबद्धवृक्षाणां लतानां वा निर्देशः कृतः वर्तते महाकविना। यथा चतुर्थे सर्गे -

**खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु।**
**कटेषु करिणां पेतुः पुंनागेभ्यः शिलीमुखाः।।**[32]

इत्यत्र खर्जूरीवृक्षस्य तथा पुन्नागवृक्षस्य पुष्पाणां निर्देशः, भूर्जेषु मर्मरीभूताः इति भूर्जस्य इत्येवंरीत्या तत्र तत्र बहूनां वृक्षाणां वृक्षाङ्गानां च नामानि निर्दिष्टानि कविकुलगुरुणा महाकाव्येऽस्मिन्। तत्रापि वैशिष्ट्यं किमित्युक्ते – क्वचिदुपमारूपेण क्वचिच्च वर्णनावसरे प्रयुक्तानि वृक्षाणां नामानि वृक्षाङ्गानां नामानि वा स्वेच्छतया न चितानि कविना अपि तु तत्तत्सन्दर्भानुगुणं यस्य प्रयोगे औचित्यं स्यात् तस्यैव च तत्र प्रयोगः इति शैली आश्रिता वर्तते। यथा आदौ निरूपितस्य अगुरुवृक्षस्य तस्मिन् धूपकारणे औचित्यं वर्तते इति तस्यैव तत्र प्रयोगः। तत्रापि विविधेषु धूपकारणेषु श्रेष्ठत्वं वहतः अगुरवृक्षस्यैव निर्देशः। एवमेव अष्टमे अजस्य शोकवर्णनवेलायाम् –

**तस्य प्रसह्य हृदयं किल शोकशङ्कुः प्लक्षप्ररोह इव सौधतलं बिभेद।**
**प्राणान्तहेतुमपि तं भिषजामसाध्यं लाभं प्रियानुगमनत्वरया स मेने।।**[33]

इति यथा सौधतलं भिनत्ति प्लक्षरोहः तथा अजस्य शोकमेव अस्त्रं भूत्वा तस्य हृदयं बिभेद इति तत्रापि सन्दर्भानुगुणमेव वर्णयति कविः। एवञ्च कविकुलगुरोः कृतिषु रघुवंशाख्ये सूर्यवंशकथनपरे महाकाव्ये न केवलं वैद्यकीयाविषयाः अपि च तत्कालीनसमाजविषयाः अन्ये च वैज्ञानिकविषयाश्च सन्निहिताः वर्तन्ते ये च सूक्ष्मावलोकने गभीराध्ययने वा ज्ञातुं शक्याः इति तदर्थं प्रयत्नः विधेय इति शम्।।

**********

## उपयुक्तग्रन्थसूची


१. अमरसिंहः, अमरकोषः, अमरपादवृत्त्यमरपादपारिजातभ्यां टीकाभ्यां सहितः, रामनाथः, वसन्ताप्रेस्, अडयार्, चेन्नै, १९७१.
२. आदिकविः श्रीवाल्मीकिः, श्रीमद्रामायणम्, रामकृतया तिलकाख्यया व्याख्यया समेतम्, वसुदेवशर्मा, निर्णयसागरमुद्रणालयः, मुम्बई, १९३०.
३. बाणभट्टः, श्रीहर्षचरितम्, श्रीरङ्गनाथकृतया मर्मावबोधिन्याख्यया व्याख्यया सहितम्, शूरनाड् कुञ्जन्, भास्करमुद्रणालयः, तिरुवेन्ड्रम्, १९५८.
४. महर्षिः अग्निवेशः, चरकसंहिता, चरकदृढबलाभ्यां प्रतिसंस्कृता, गङ्गाधरकविराजविरचितया जल्पकल्पतरुसमाख्यया टीकया सहिता, कविराजः श्रीनरेन्द्रनाथसेनागुप्तः, कविराजः श्रीबलाइचन्द्र सेनागुप्तः, धन्वन्तरि मुद्रणालयः, कलिकता, १९५२.


32. रघुवंशम् ४.५७
33. रघुवंशम् ८.९३

५. महर्षिः अग्निवेशः, चरकसंहिता, चरकदृढबलाभ्यां प्रतिसंस्कृता, चक्रपाणिदत्ताचार्यस्य आयुर्वेददीपिकाख्यया व्याख्यया सहिता यादवशर्मा, निर्णयसागरमुद्रणालयः, मुम्बई, १९४१.
६. महाकविश्रीकालिदासः, रघुवंशमहाकाव्यम्, ज्वालाप्रसादमिश्रस्य भावार्थादिभिः सहितम्, खेमराज श्रीकृष्णदासः, श्रीवेङ्कटेश्वर-प्रेस्, मुम्बई, १९६४.
७. महाकविश्रीकालिदासः, रघुवंशमहाकाव्यम्, मणिप्रभाख्यया हिन्दीव्याख्योपेतम्, श्रीहरगोविन्दमिश्रः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, १९६१.
८. महाकविश्रीकालिदासः, रघुवंशमहाकाव्यम्, सञ्जीविन्या समेतम्, मोरेश्वर रामचन्द्र काळे, मुम्बई वैभव मुद्रणालयः, मुम्बई, १९२२
९. राजवल्लभः, राजवल्लभनिघण्टुः, भाषाटीकाविभूषितः, श्रीमान् नारायणदासः, लक्ष्मीवेङ्कटेश्वरमुद्रणालयः, मुम्बई, १९५२.
१०. श्वनाथकविराजः, साहित्यदर्पणः, विमलाख्यया हिन्दीव्याख्यया विभूषितः, श्रीशालग्रामशास्त्री, मोतलीलाबनारसीदास, देहली, १९७